National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 289-291
© 2025 NJHSR
www.sanskritarticle.com

**डा. कृष्ण ए नागसम्पिगे**
योजनासहायकः,
ओरियन्टल् रीसर्च् इन्स्टिट्यूट्,
मैसूरु

**Correspondence:**
**डा. कृष्ण ए नागसम्पिगे**
योजनासहायकः,
ओरियन्टल् रीसर्च् इन्स्टिट्यूट्,
मैसूरु

# साध्य-साधन-इतिकर्तव्यताकाङ्क्षादीनां निरूपणम्

**डा. कृष्ण ए नागसम्पिगे**

पूर्वमीमांसाशास्त्रे किं भावयेत्, केन भावयेत्, कथं भावयेत् इति आकाङ्क्षात्रयं (भावनायाः) विचाराङ्गमित्युक्तम्। तत्र किं भावयेदिति साध्याकाङ्क्षा। केन भावयेदिति साधनाकाङ्क्षा। कथं भावयेदिति इतिकर्तव्यताकाङ्क्षा । तद्विषये किञ्चिन्निरूप्यते मया अस्मिन् प्रबन्धे ॥

### ❖ भावनाबोधकपदविवरणम्

धर्मरूपः यागादिः 'यजेत स्वर्गकामः' इत्यादिवेदवाक्येन स्वर्गादिरूपफलाय पुरुषं प्रति विधीयते । 'यजेत' इत्यत्र 'यज्' इति धातुः, 'त' इति प्रत्ययः इति अंशद्वयं विद्यते । त' इति प्रत्ययेऽपि आख्यातत्वं लिङ्त्वम् इति धर्मद्वयविशिष्टौ आख्यातांशलिङ्शौ स्तः । द्वयोः अंशयोः भावना एव अर्थः ॥

यजेत स्वर्गकामः
↓
यज् + त
↓
आख्यातत्वम् लिङ्गत्वम्
↑
आख्यातम् लिङ्
↑
भावना

### ❖ भावना

आख्यातम्, लिङ् च इति द्वाभ्याम् अंशाभ्यां 'भावना' उच्यते ।

भावना नाम उत्पद्यमानस्य स्वर्गादिफलस्य उत्पत्त्यनुकूलः उत्पादकस्य पुरुषस्य व्यापारविशेष (फलजनकः पुरुषस्य व्यापारविशेषः भावना) ।

सा च भावना शब्दभावना, अर्थभावना इति द्विविधा ।

भावना
↓
शब्दभावना अर्थभावना
↓
लिङ्ग आख्यातम्
↑
त
↑
यजेत

### ❖ शाब्दी

शिष्यादिपुरुषस्य प्रवृत्तिजनकः, आचार्यादिपुरुषस्य व्यापारविशेषः शाब्दी भावना (शब्दे विद्यमाना भावना शब्दभावना) । प्रेरणा, प्रवर्तना, विधिः इति शाब्द्याः पर्यायपदानि। लिङ् इति अंशेन शब्दभावना अभिधीयते। 'गच्छेत्' इत्यादिपदस्य श्रवणे 'अयम् आचार्यः मां गमने प्रवर्तयति', अथवा' मयि प्रवृत्तेः उत्पादकव्यापारवान् अयम् आचार्यः' इति नियमेन ज्ञायते।

पुरुषप्रवृत्तिजनिका भावयितुः व्यापारविशेषरूपा शब्दभावना लौकिकवाक्ये 'गामानय' इत्यादिरूपा। सा आचार्यादिप्रवर्तकपुरुषे विद्यमानः इच्छारूपः अभिप्रायविशेषः। 'यजेत स्वर्गकामः' इत्यादि-वैदिकवाक्ये पुरुषाभिप्रायाभावात् अयं व्यापारविशेषः लिङादिशब्दे विद्यमानः धर्मविशेषः एव। शब्दे निष्टत्वादेव इयं भावना शब्दभावना इति कथ्यते ।





### ❖ शब्दभावनायाः अंशत्रयम्

सा च शब्दभावना 'साध्यम्', 'साधनम्', 'इतिकर्तव्यता' इति अंशत्रयम् आकाङ्क्षति। अंशत्रयस्यैव 'किम्', 'केन', 'कथम्' इति आकारः। शब्दभावनायाः साध्याकाङ्क्षायां साध्यम्, साधनम्, इतिकर्तव्यता इति अंशत्रयवती अर्थभावना साध्यत्वेन अन्वेति। तत्र च प्रमाणं समानाभिधानश्रुतिः। अर्थात् एकप्रत्ययगम्यत्वम्। 'यजति' इत्यादिषु विद्यमानेन एकेन 'त' इति प्रत्ययेन शाब्दी, आर्थी इति भावनाद्वयम् अवगम्यते । अर्थात् 'त' इति प्रत्यये विद्यमानाभ्याम् आख्यातम्, लिङिति द्वाभ्याम् अंशाभ्यां शाब्दी, आर्थी इति द्वे भावने अभिधीयेते । एवम् एकप्रत्ययाभिधेयत्वमेव शब्दभावनायाम् अर्थभावनायाः अन्वये प्रमाणम्।

शब्दभावनायाः करणाकाङ्क्षायां लिङ्लेट्लोट्तव्यप्रत्ययानां ज्ञानं साधनत्वेन सम्बध्यते ।

इतिकर्तव्यताकाङ्क्षायाम् अर्थवादेन ज्ञाप्यः 'प्रशस्तः' इत्याकारकं प्राशस्त्यज्ञानम् इतिकर्तव्यतात्वेन सम्बध्यते। भावना सर्व आकांक्षात्रयोपेता ॥





### ❖ अर्थभावना

फले इच्छावशात् उत्पन्नः क्रियाविषयव्यापारः अर्थभावना (भाव्यम्, करणम्, इतिकर्तव्यता इति भावनायाम् अंशत्रयम्) । स्वर्गादिरूपे फले रागादिना उत्पन्नः यागादिक्रियाविषयकः यः पुरुषस्य व्यापारविशेषः सः अर्थभावना । प्रवृत्तिः, यत्नः, प्रयत्नः, कृतिः इत्येवं पर्यायपदानि ।

### ❖ अर्थभावनायाः अंशत्रयम्

सा अर्थभावना 'त' इति प्रत्यये विद्यमानेन आख्यातांशेन उच्यते। यतो हि आख्यातस्य व्यापारः अर्थः । च अर्थभावना भावनासामान्यादेव 'साध्यम्', 'साधनम्', 'इतिकर्तव्यता' इति अंशत्रयम् इच्छति। अस्यैव अंशत्रयस्य 'किम्','केन','कथम्' इति आकारः। अर्थभावनायाः साध्याकाङ्क्षायां स्वर्गादिरूपं फलं साध्यत्वेन अन्वेति साध्यम् भाव्यम्, फलम् ।

अर्थभावनायाः साधनाकाङ्क्षायां धात्वर्थयागादिः साधनत्वेनान्वेति । इतिकर्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गसमूहः इतिकर्तव्यतात्वेन अन्वेति।




सा च भावना मुख्यविशेष्यभूता । प्रकृत्यर्थप्रत्ययार्थयोः मध्ये प्रत्ययार्थः प्रधानः भवति। आख्यातार्थेषु बहुषु सत्सु, भावः नाम भावना प्रधानम्। 'देवदत्तः ओदनं पचति' इत्यत्र 'देवदत्तकर्तृका ओदनकर्मिका पाकानुकूला भावना' इति शाब्दबोधः ।

| | | |
|---|---|---|
| देवदत्तः | ओदनं | पचति |
| देवदत्त + सु | ओदन + अम् | पच् + त |
| कर्ता | कर्म | क्रिया- कृतिः |
| देवदत्तकर्तृका | ओदनकर्मिका | पाकानुकूला भावना |

अत्र एकः प्रधानांशः विवेचनीयः । साध्यमिति अंशः लोके प्रसिद्धः। करणम् इत्यंशः इतिकर्तव्यता इत्यंशः किञ्चित् विवेचनीयः ।

अत्र करण शब्देन यथाश्रुतं स्वोत्पादकत्वं करणत्वं न ग्राह्यं । यतो हि दण्डकरणकः घटः इत्युक्ते दण्डनिष्ठकरणतानिरूपित कार्यताश्रयः घटः इति बोधः भवति । तथा आर्थीभावनायां यागस्य करणत्वेन यदि अन्वयः क्रीयते तदा अनुपपन्नः भवति । यागं प्रति भावना करणं न । करणं नाम स्वोत्पादकं स्वोत्पत्ति अव्यवहित प्राक्क्षणे विद्यामनं यत्। न हि यागेन आर्थीभावन जायते । अपितु आर्थीभावनया ( कृत्या) यागः जायते इति वैपरीत्यं अस्तु । तर्हि कथं यागः आर्थीभावनां प्रति करणम् ? अतः न स्वोत्पादकत्वं करणत्वं न स्वीकुर्मः । अपि तु भावना भाव्य Page निर्वर्तकत्वस्वरूपं पारिभाषिकं करणत्वं स्वीक्रीयते। अस्य अर्थः

भावना भाव्यं स्वर्गः । तन्निर्वतकत्वं नाम जनकत्वं यागस्य वर्तते। भावना भाव्य स्वर्गनिर्वर्तकत्वेन भावना निर्वर्तकत्वम् अपि वर्तते इति अभिप्रायः। एवं करणत्वविवेचनं क्रीयते।

इति कर्तव्यता इति शब्दः प्रयुक्तः । अस्य कः अर्थः नाम "कर्तव्यस्य इति" इतिकर्तव्यता विग्रहः प्रदर्शितः (कर्तव्यविशेषः इत्यर्थः लब्धः) । यागः कर्तव्यः तथा अनेके प्रयाजादि विशेषाः कर्तव्याः इति। तस्मात् कर्तव्यविशेषाकाङ्क्षा इति तस्य अर्थः ॥

**अमत्र सम्पिण्डितः अर्थः**

'सोमेन यजेत' इत्यादौ 'त' इति प्रत्ययेन भावना बोध्यते । तस्यां भावनायाम् उपपदार्थस्य सोमस्य एवं धात्वर्थस्य यागस्यापि करणत्वेन अन्वयः भवति न वा इति संशयं कृत्वा एकेन पदेन बोधितत्वात् धात्वर्थस्यैव भावनायां करणत्वेन अन्वयः इति सिद्धान्तः क्रियते।

सा च भावना यजेत इत्यादिपदेषु विद्यमानेन त इति प्रत्ययेन बोध्यते। भावना नाम फलोत्पादकः पुरुषस्य व्यापारविशेषः । सा भावना शाब्दी, आर्थी इति द्विविधा विद्यते । त इति प्रत्यये आख्यातांशः, लिङ्गशः इति अंशद्वयं वर्तते । तयोः आख्यातांशेन अर्थभावना अभिधीयते। लिङ्गशेन शब्दभावना अभिधीयते।

परपुरुषस्य प्रवृत्तिजनकः प्रवर्तकपुरुषस्य व्यापारविशेषः शब्दभावना। शब्दभावनायाः साध्यं प्रवृत्तिः नाम अर्थभावना अस्ति। साधनं लिङ्गादिज्ञानं भवति। इतिकर्तव्यता प्राशस्त्यज्ञानं भवति।

फलं प्राप्तुम् इच्छावशात् क्रियमाणक्रियायाः उत्पादकः व्यापारविशेषः अर्थभावना भवति । तस्यां भावनायां साध्यं स्वर्गादिफलं भवति। साधनं धात्वर्थः भवति। इतिकर्तव्यता प्रयाजादिकम् अङ्गं भवति ।।

एवं सर्वेषु शास्त्रेष्वपि साध्य साधन इतिकर्तव्यताकाङ्क्षादीनां अनुसन्धानेन शास्त्राणाम् अध्ययने आनुकूल्यं भावति यथा-

शास्त्रोद्दिष्टक्रमेण तदीयपद्धत्या वा शास्त्रविचारः साध्यः। तदङ्गभूतानि साधनानि च ज्ञेयानि। तेषां साधनानामनुष्ठानक्रमः इतिकर्तव्यता। साध्यसाधनाय न केवलं साधनानां ज्ञानम् अपितु साधनानां प्रयोगरीतिः अनुष्ठानक्रमश्च सम्यक् ज्ञातव्यः। एतदेव इतिकर्तव्यता।

एवं भारतीयशास्त्राणामपि महत्प्रयोजनं किञ्चिदस्तीति जानीमः। तत्प्रयोजनं प्राप्तुं शास्त्रस्थाः विषयाः ज्ञेयाः। ग्रन्थस्थविषयाणां ज्ञानार्थं किं साधनम्? अध्ययनम् अत्र साधनम्। किन्तु कथं ते ग्रन्थाः पठनीयाः इत्यज्ञाने न भवति अध्ययनस्य किञ्चित् प्रयोजनम् । सर्वोऽपि ग्रन्थः अंशत्रययुक्तः। प्रतिपाद्यः विषयः, तदीया भाषा, विषयनिरूपणक्रमश्च। तत्र विषयः ग्रन्थस्य उपादानभूतं मूलद्रव्यम् । निरूपणक्रमः विषयस्य आकारः। अर्थात् आकृतिः। भाषा च विषयआकारयोः सम्बन्ध-परिकल्पकं साधनम् इत्यादि ।

आकर ग्रन्थ

मीमांसा न्यायप्रकाशः

अर्थसङ्ग्रहः

शास्त्रपद्धतिः